ैश्यपार्थिवौ" मनुः ८परमेश्वरे पु० "गुप्तश्चक्रगदाधरः" विष्णुस० "वाङ्मनसयोरगोचरत्वात् गुप्तः "एष सर्वेषु भूतेषु गूढ़ोत्मा न प्रकाशते" इति श्रुतेः"भा०।

**गुप्तक** पु० जयद्रथसेनानीभेदे। "अङ्गारकः कुञ्जरो गुप्तकश्च शत्रुञ्जयः सञ्जयसंप्रहर्षौ" भा० आ० २६४अ०। स्वार्थे क। २गुप्तार्थे त्रि०। [२गूढ़गमने त्रि०।

**गुप्तगति** पु० गुप्ता गतिर्यस्य। अपसर्पे १गुप्तचरे शब्दार्थचि०।

**गुप्तचर** त्रि० गुप्तश्चरो यस्य। १गूढ़भावेन चरणेरके। २बलभद्राख्ये यदुवंश्ये पु० त्रिका०। कर्म्म०। ३गूढ़े दूतभेदे पु०

**गुप्तस्नेह** पु० गुप्तः स्नेहोऽत्र। १अङ्कोटवृक्षे राजनि०। कर्म्म०। २गूढ़े स्नेहे "गुप्तस्नेहकरी(दृष्टिः)तृतीयभवने" नीलकण्ठताजकम्।

**गुप्ति** स्त्री गुप—भावे क्तिन्। १गोपने "भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था" सा० द०। २संवरणे "हृन्मणिशिलासालं गुप्तावपि मनोरमम्" कुमा०। "असिधारासु कोषगुप्तिः" काद०। "स्थानं समुदयं गुप्तिं लब्धप्रशमनादिकम्" मनुः। ३रक्षणे "सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः" (ईश्वरः)मनुः।४मन्त्रसंस्कारभेदे तन्त्रसा० 'गौतमीये "जननं जीवनं पश्चात् ताड़नं बोधनं तथा। तथाभिषेको विमलीकरणाप्यायने पुनः। तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंक्रियाः" इति विभज्य "जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम्" इति लक्षितम्। आधारे क्तिन्। ५अवस्करस्थाने ६कारागारस्थाने मेदि०। "चिरमतिरसलौल्यात् बन्धनं लम्भितानां पुनरयमुदयाय प्राप्य धाम स्वमेव। दलितदलकपाटः षट्पदानां सरोजे सरभस इव गुप्तिस्फोटमर्कः करोति" माघः ७भूगर्त्ते। करणे क्तिन्। ८अहिंसादौ योगाङ्गे यमे च हेमच०। ९गर्त्तार्थं क्षितेरुत्खनने १०नौकाछिद्रे भरतः।

**गुफ** ग्रन्थे तुदा० पर० सक० सेट् मुचा०। गुम्फति अगोफीत् जुगोफ।

**गुफित** त्रि०गुफ—गुन्फ—वा कर्म्मणि क्त। ग्रथिते अमरः।

**गुम्फ** ग्रन्थने तुदा० पर० सक० सेट्। गुम्फति अगुम्फीत्। जुगुम्फ गुम्फितः। नोपधत्वात् गुम्फित्वा क्विपि गुन् गुभौ गुभ इति। [च शब्दरत्ना०।

**गुम्फ** पु०गुम्फ—घञ्।१ग्रन्थने, २बाहोर्भूषणे मेदि०३श्मश्रुणि

**गुम्फना** स्त्री गुम्फ—युच्। "वाक्ये शब्दार्थयोः सम्यग्रचना गुम्फना स्मृता" इत्युक्तायां १वाक्यस्य चारुरचनायाम्। २ग्रन्थने च (गाँथा) भावे ल्युट्। २ग्रन्थने न०।

**गुम्फित** त्रि० गुम्फ—क्त। सुम्नादिना ग्रथिते, अमरः।

**गुर** बधे गत्याञ्च दिवा० आत्म० सक० सेट्। गूर्य्यते अगोरिष्ट। जुगोर। ईदित् गूर्णः। गोरणम्।

**गुर** उद्यमे तुदा० कुटा० आत्म० अक० सेट्। गुरते अगुरिष्ट जुगोर गुरणम् ईदित् गूर्णः। वेदे तु नि०मूर्त्त इत्येव। "इषो हवो गूर्त्तमाः" ऋ० १।१६७।१। "गूर्वीं ऋषसः शरदश्च गूर्त्ताः" ऋ० ४।१६।८। "अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने" स्मृतिः। "यो ब्राह्मणायावगुरेत् तं शतेन यातयात्" श्रुतिः छान्दसः पदव्यत्ययः। एवं "न कदाचिद् द्विजे तस्माद्विद्वानवगुरेदपि" मनुः।

**गुरण** न० कुटा०गुर—भावे ल्युट्। हननाद्यर्थमुद्यमे अमरः। दैवादिकस्य गोरणमित्येव। तच्च बधे गत्याञ्च। अव+गोरणं हननार्थमुद्यमे इति भेदः।

**गुरु** पु० गिरत्यज्ञानं रटणात्युपदिशति धर्मं गॄ—गिरणे, गॄ—शब्दे कर्त्तरि, गीर्य्यते स्तूयते वा कर्मणि वा कु उच्च। १बृहस्पतौ देवाचार्य्ये अमरः। "गुरुकाव्यानुगां बिभ्रत्" माघः। "गुरोर्भृगोरस्तबाल्ये"नीचस्थे सिंहगे गुरौ" ज्यो०त०। २प्रभाकराख्ये मीमांसकभेदे तस्य तन्नामता यथा "अत्र तु नोक्तम् तत्रापिनोक्तम् अतः पौनरुक्त्यम्" इत्यत्र स्वगुरोः संशये जाते प्रभाकरेण तदसन्निधाने तत्पुस्तके तुना, अपिना, इति पदच्छेदः कृतः उत्तरकाले गुरुणा तद्दृष्ट्वा केनेदृशः पदच्छेदः कृतः इति पृष्टे अन्यशिष्यै द्वारा प्रभाकरकृतत्वं निश्चित्य तस्य संशयापनोदकत्वात् गुरुरिति संज्ञा कृतेति आख्यायिका "गुरोर्गिरः पञ्चदिनान्यधीत्य" सा०द०। "अर्थापत्तिर्गुरूणाम्" शब्द०प्र०। "निषेकादीनि कर्म्माणि यः करोति यथाविधि। सम्भावयति चान्नेन स विप्रो गुरुरुच्यते" मनूक्ते "स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति" याज्ञ० उक्ते च निषेकादिक्रियाकर्त्तरि ३पितरि प्रायश्चित्तवि०। "न केवलं तद्गुरुरेकपार्थिवः" रघुः गुरुतल्पगशब्दे विवृतिः। "अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः। तमपीह गुरुं विद्यात् श्रुतोपक्रियया तया" मनूक्ते शास्त्रोपदेशके ४आचार्य्यादौ तद्विषये "पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः। गुरुराहवनीयस्तु साग्नित्रेता गरीयसी" इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्। गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते" मनुः। "तौ गुरुर्गुरुपत्नी च" रघुः। "आचार्य्यश्च पिता ज्येष्ठो भ्राता चैव महीपतिः। मातुलः श्वशुरस्त्राता मातामहपितामहौ।